# सुरवाणीसमाराधकेभ्यः स्वागतम्



डा. कं.कादम्बिनी
सहायकाचार्या
रा. सं. विद्यापीठम्, तिरुपतिः

# अथ सप्तमीविभक्तिः

# सप्तमीविभक्तिः

- वस्तूनां यः आधारः भवति, तस्य सप्तमीविभक्तिः भवति।

  यथा

  तिरुपति नगरे बालाजी मन्दिरमस्ति।
  ग्रन्थालये पुस्तकानि सन्ति।
  विद्यालये उद्यानमस्ति।
  वृक्षे फलानि सन्ति।

# कुत्र किमस्ति इति कथयन्तु

विद्यालयः – ग्रन्थालयः -- ग्रन्थाः – नीतिविषयाः

पाठशाला – वाटिका – लता – शाखा – पिपीलिका

तिरुपतिनगरम् – शान्तिनगरम् – उद्यानम् – सस्यं – फलम् – बीजानि

नगरी – विपणिः – वीथी – प्रदर्शिनी – अधिकारिणी

# विषयरूप आधारस्यापि सप्तमीविभक्तिः

यस्मिन् विषये आसक्तिः, रुचिः वा भवति, सः विषयः, विषयरूप आधारः इत्युच्यते।

तस्यापि सप्तमीविभक्तिः भवति।

यथा

संस्कृताध्ययने मम आसक्तिः अस्ति।

शरीरस्य अलङ्कारे मम रूचिः नास्ति।

चित्रलेखने बालकस्य अतीव आसक्तिः।

# स्निह्यति, विश्वसिति इत्येतयोः प्रयोगे सप्तमीविभक्तिः

- स्निह्यति, विश्वसिति इत्येतयोः प्रयोगे स्नेहस्य विश्वासस्य यत् पात्रं तस्य सप्तमीविभक्तिः भवति।
- यथा
  - माता पुत्रे विशेषतः स्निह्यति।
  - दशरथः स्वपुत्रेषु अधिकं स्निह्यति स्म।
  - राजकीयजनेषु कदापि मा विश्वसन्तु।
  - वञ्चके मा विश्वसतु।

# ग्रहणं, ताडनं, प्रहरणं इत्येतेषां योगे सप्तमीविभक्तिः

- यस्मिन् अङ्गे ग्रहणं, ताडनं, प्रहरणमित्यादिकं भवति तस्य अङ्गस्य सप्तमीविभक्तिः भवति।
- यथा
  - सः तं वक्षस्थले प्रहृतवान्।
  - आरक्षकः चोरं कण्ठे गृहीतवान्।
  - माता पुत्रं प्रीत्या मस्तके ताडितवती।

# पृथक् करणे सप्तमीविभक्तिः

- यथा
  - पर्वतेषु हिमालयः उन्नतः।
  - देशेषु भारतदेशः श्रेष्ठः।
  - नदीषु गङ्गा पवित्रा।

# एतेषां सप्तम्यन्तरीपाणि कथयन्तु

| **सः** | **एषः** |
|---|---|
| सा | एषा |
| भवान् | भवन्तः |
| अहम् | वयम् |
| भवती | भवत्यः |
| ते | एते |
| ताः | एताः |

# सप्तमीविभक्तेः प्रयोगः -

- वस्तुरूप-आधारस्य,
- विषयरूप-आधारस्य,
- स्निह्यति, विश्वसिति इत्येतयोः प्रयोगे
- ग्रहणं, ताडनं, प्रहरणं इत्येतेषां योगे च सप्तमीविभक्तिः भवति ।

धन्यवादाः